# Shri Saubhagya Kavacha Stotram

# શ્રીસૌભાગ્યકવચસ્તોત્રમ્

## Document Information

Text title : Saubhagyakavacham

File name : saubhAgyakavacham.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Rama Prakasha ramaprakashak at gmail.com

Proofread by : Rama Prakasha ramaprakashak at gmail.com

Description/comments : vAmakeshvarantantre nityAShoDashikArNave

Latest update : September 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Shri Saubhagya Kavacha Stotram

# શ્રીસૌભાગ્યકવચસ્તોત્રમ્

॥ પૂર્વપીઠિકા ॥

કૈલાસશિખરે રમ્યે સુખાસીનં સુરાર્ચિતં
ગિરીશં ગિરિજા સ્તુત્વા સ્તોત્રૈર્વેદાન્તપારગૈઃ ।
પ્રણમ્ય પરયા ભક્ત્યા તમપૃચ્છત્ કૃતાઞ્જલિઃ
રહસ્યં રક્ષણં કિં વા સર્વસમ્પત્કરં વદ ॥

શ્રીશિવોવાચ -
શ‍ૃણુ દેવિ! પ્રવક્ષ્યામિ યસ્માત્ ત્વં પરિપૃચ્છસિ
યસ્ય શ્રવણમાત્રેણ ભવભીતિર્ન જાયતે ।
એતત્ સૌભાગ્યકવચ રહસ્યાતિરહસ્યકં
સૌભાગ્યકવચં દેવિ! શ‍ૃણુ સૌભાગ્યદાયકમ્ ॥

વિનિયોગઃ -
અસ્ય શ્રીસૌભાગ્યકવચસ્તોત્રસ્ય શ્રીઆનન્દભૈરવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીસૌભાગ્યસુન્દરી દેવતા । ૐ ક્લીં સૌઃ બીજમ્ ।
હ્રીં ક્લીં શક્તિઃ । આં હ્રીં ક્રોં કીલકમ્ ।
સર્વસૌભાગ્યસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ॥

ઋષ્યાદિન્યાસઃ -
શિરસિ શ્રીઆનન્દભૈરવાય ઋષયે નમઃ । મુખે અનુષ્ટુપ્છન્દસે નમઃ ।
હૃદિ શ્રીસૌભાગ્યસુન્દરીદેવતાયૈ નમઃ । ગુહ્યે ૐ ક્લીં સૌઃ બીજાય નમઃ ।
પાદયોઃ હ્રીં ક્લીં શક્તયે નમઃ । નાભૌ આં હ્રીં ક્રોં કીલકાય નમઃ ।
સર્વાઙ્ગે સર્વસૌભાગ્યસિદ્ધ્યર્થે પાઠે વિનિયોગાય નમઃ ।

ષડઙ્ગન્યાસઃ -

કરન્યાસઃ -
ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ ।

ક્લીં તર્જનીભ્યાં નમઃ ।
સૌઃ મધ્યમાભ્યાં નમઃ ।
ઐં અનામિકાભ્યાં નમઃ ।
ક્લીં કનિષ્ઠિકાભ્યાં નમઃ ।
સૌઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -
ઐં હૃદયાય નમઃ ।
ક્લીં શિરસે સ્વાહા ।
સૌઃ શિખાયૈ વષટ ।
ઐં કવચાય હું ।
ક્લીં નેત્રત્રયાય વૌષટ્ ।
સૌઃ અસ્ત્રાય ફટ્ ॥

ધ્યાનં -
ઐહિકપરફલદાત્રીમૈશાનીં મનસિ ભાવયે મુદ્રામ્ ।
ઐન્દવકલાવતંસામૈશ્વર્યસ્ફુરણપરિણતિં જગતામ્ ॥ ૧॥

ક્લીબત્વદૈત્યહન્ત્રી ક્લિન્નમનસ્કાં મહેશ્વરાશ્લિષ્ટામ્ ।
ક્લૃપ્તજનેષ્ટકર્ત્રીં કલ્પિતલોકપ્રભાં નમામિ કલામ્ ॥ ૨॥

સૌભાગ્યદિવ્યકનિધિં સૌરભકચવૃન્દવિચલદલિમાલામ્ ।
સૌશીલ્યશેષતલ્પાં સૌન્દર્યવિભામઞ્જરીં કલયે ॥ ૩॥

પાશપાણિ સૃણિપાણિ ભાવયે ચાપપાણિ શરપાણિ દૈવતમ્ ।
યત્પ્રભાપટલપાટલં જગત્ પદ્મરાગમણિમણ્ડપાયતે ॥ ૪॥

હેમાદ્રૌ હેમપીઠસ્થિતામખિલસુરૈરીડ્યમાનાં વિરાજત્ ।
પુષ્પેષ્વિષ્વાસપાશાઙ્કુશકરકમલાં રક્તવેષાતિરક્તામ્ ॥ ૫॥

દિક્ષૂદ્યદ્ભિશ્ચતુર્ભિર્મણિમયકલશૈઃ પઞ્ચશક્ત્યાઞ્ચિતૈઃ સ્વ ।
ભ્રષ્ટૈઃ ક્લૃપ્તાભિષેકાં ભજત ભગવતીં ભૂતિદામન્ત્યયામે ॥ ૬॥

કવચસ્તોત્રં -
શિખાગ્રં સતતં પાતુ મમ ત્રિપુરસુન્દરી ।
શિરઃ કામેશ્વરી નિત્યા તત્પૂર્વં ભગમાલિની ॥ ૧॥

નિત્યક્લિન્નાઽવતાદ્દક્ષં ભેરુણ્ડા તસ્ય પશ્ચિમમ્ ।

વહ્નિવાસિન્યવેદ્ વામં મુખં વિદ્યેશ્વરી તથા ॥ ૨॥

શિવદૂતી લલાટં મે ત્વરિતા તસ્ય દક્ષિણમ્ ।
તદ્વામપાર્શ્વમવતાત્ તથૈવ કુલસુન્દરી ॥ ૩॥

નિત્યા પાતુ ભ્રુવોર્મધ્યં ભ્રુવં નીલપતાકિની ।
વામભ્રુવં તુ વિજયા નયનં સર્વમઙ્ગલા ॥ ૪॥

જ્વાલામાલિન્યક્ષિ વામં ચિત્રા રક્ષતુ પક્ષ્મણી ।
દક્ષશ્રોત્રં મહાનિત્યા વામં પાતુ મહોદ્યમા ॥ ૫॥

દક્ષં વામં ચ વટુકા કપોલૌ ક્ષેત્રપાલિકા ।
દક્ષનાસાપુટં દુર્ગા તદન્યં તુ ભારતી ॥ ૬॥

નાસિકાગ્રં સદા પાતુ મહાલક્ષ્મીર્નિરન્તરમ્ ।
અણિમા દક્ષકટિં મહિમા ચ તદન્યકમ્ ॥ ૭॥

દક્ષગણ્ડં ચ ગરિમા લઘિમા ચોત્તરં તથા ।
ઊર્ધ્વોષ્ઠકં પ્રાપ્તિસિદ્ધિઃ પ્રાકામ્યમધરોષ્ઠકમ્ ॥ ૮॥

ઈશિત્વમૂર્ધ્વદન્તાંશ્ચ હ્યધોદન્તાન્ વશિત્વકમ્ ।
રસસિદ્ધિશ્ચ રસનાં મોક્ષસિદ્ધિશ્ચ તાલુકમ્ ॥ ૯॥

તાલુમૂલદ્વયં બ્રાહ્મીમાહેશ્વર્યૌ ચ રક્ષતામ્ ।
કૌમારી ચિબુકં પાતુ તદધઃ પાતુ વૈષ્ણવી ॥ ૧૦॥

કણ્ઠં રક્ષતુ વારાહી ચૈન્દ્રાણી રક્ષતાદધઃ ।
કૃકાટિકાં તુ ચામુણ્ડા મહાલક્ષ્મીસ્તુ સર્વતઃ ॥ ૧૧॥

સર્વસઙ્ક્ષોભિણીમુદ્રા સ્કન્ધં રક્ષતુ દક્ષિણમ્ ।
તદન્યં દ્રાવિણીમુદ્રા પાયાદંસદ્વયં ક્રમાત્ ॥ ૧૨॥

આકર્ષણી વશ્યમુદ્રા ચોન્માદિન્યથ દક્ષિણમ્ ।
ભુજં મહાઙ્કુશા વામં ખેચરી દક્ષકક્ષકમ્ ॥ ૧૩॥

વામકક્ષં બીજમુદ્રા યોનિમુદ્રા તુ દક્ષિણમ્ ।
લસત્ ત્રિખણ્ડિનીમુદ્રા વામભાગં પ્રપાલયેત્ ॥ ૧૪॥

શ્રીકામાકર્ષિણી નિત્યા રક્ષતાદ્ દક્ષકૂર્પરમ્ ।
કૂર્પરં વામમવતાત્ સા બુદ્ધ્યાકર્ષિણી તથા ॥ ૧૫॥

અહઙ્કારાકર્ષિણી તુ પ્રકાણ્ડં પાતુ દક્ષિણમ્ ।
શબ્દાકર્ષિણિકા વામં સ્પર્શાકર્ષિણિકાઽવતુ ॥ ૧૬॥

પ્રકોષ્ઠં દક્ષિણં પાતુ રૂપાકર્ષિણિકેતરમ્ ।
રસાકર્ષિણિકા પાતુ મણિબન્ધં ચ દક્ષિણમ્ ॥ ૧૭॥

ગન્ધાકર્ષિણિકા વામં ચિત્તાકર્ષિણિકાઽવતુ ।
કરભં દક્ષિણં ધૈર્યાકર્ષિણી પાતુ વામકમ્ ॥ ૧૮॥

સ્મૃત્યાકર્ષિણ્યસૌ વામં નામાકર્ષિણિકેતરમ્ ।
બીજાકર્ષિણિકા પાયાત્ સતતં દક્ષિણાઙ્ગુલીઃ ॥ ૧૯॥

આત્માકર્ષિણિકા ત્વન્યા અમૃતાકર્ષિણી નખાન્ ।
શરીરાકર્ષિણી વામનખાન્ રક્ષતુ સર્વદા ॥ ૨૦॥

અનઙ્ગકુસુમા શક્તિઃ પાતુ દક્ષિણસ્તનોપરિ ।
અનઙ્ગમેખલા ચાન્યસ્તનોર્ધ્વમભિરક્ષતુ ॥ ૨૧॥

અનઙ્ગમદના દક્ષસ્તનં તચ્ચૂચુકં પુનઃ ।
રક્ષતાદનિશં દેવી હ્યનઙ્ગઃમદનાતુરા ॥ ૨૨॥

અનઙ્ગરેખા વામં તુ વક્ષોજ તસ્ય ચૂચુકમ્ ।
અનઙ્ગવેગિની ક્રોડમનઙ્ગાસ્યાઙ્કુશાઽવતુ ॥ ૨૩॥

અનઙ્ગમાલિની પાયાદ્ વક્ષઃસ્થલમહર્નિશમ્ ।
સર્વસઙ્ક્ષોભિણી શક્તિર્હૃત્ સર્વદ્રાવિણી પરા ॥ ૨૪॥

કુક્ષિં સર્વાકર્ષિણી તુ પાતુ પાર્શ્વં ચ દક્ષિણમ્ ।
આહ્લાદિની વામપાર્શ્વં મધ્યં સમ્મોહિની ચિરમ્ ॥ ૨૫॥

સા સર્વસ્તમ્ભિની પૃષ્ઠં નાભિં વૈ સર્વજૃમ્ભિણી ।
વશઙ્કરી વસ્તિદેશં સર્વરઞ્જિની મે કટિમ્ ॥ ૨૬॥

સા તુ સર્વોન્માદિની મે પાયાજ્જઘનમણ્ડલમ્ ।
સર્વાર્થસાધિની શક્તિઃ નિતમ્બં રક્ષતાન્મમ ॥ ૨૭॥

દક્ષસ્ફિચં સદા પાતુ સર્વસમ્પત્તિપૂરિણી ।
સર્વમન્ત્રમયી શક્તિઃ પાતુ વામસ્ફિચં મમ ॥ ૨૮॥

પાયાત્ કુકુન્દરદ્વન્દ્વં સર્વદ્વન્દ્વક્ષયઙ્કરી ।
સર્વસિદ્ધિપ્રદા દેવી પાતુ દક્ષિણ વઙ્ક્ષણમ્ ॥ ૨૯॥

સર્વસમ્પત્પ્રદા દેવી પાતુ મે વામવઙ્ક્ષણમ્ ।
સર્વપ્રિયઙ્કરી દેવી ગુહ્યં રક્ષતુ મે સદા ॥ ૩૦॥

મેઢ્રં રક્ષતુ મે દેવી સર્વમઙ્ગલકારિણી ।
સર્વકામપ્રદા દેવી પાતુ મુષ્કં તુ દક્ષિણમ્ ॥ ૩૧॥

પાયાત્ તદન્યમુષ્કં તુ સર્વદુઃખવિમોચિની ।
સર્વમૃત્યુપ્રશમની દેવી પાતુ ગુદં મમ ॥ ૩૨॥

પાતુ દેવી ગુહ્યમધ્યં સર્વવિઘ્નનિવારિણી ।
સર્વાઙ્ગસુન્દરી દેવી રક્ષતાદ્ દક્ષસક્થિકમ્ ॥ ૩૩॥

વામસક્થિતલં પાયાત્ સર્વસૌભાગ્યદાયિની ।
અષ્ઠીવં મમ સર્વજ્ઞા દેવી રક્ષતુ દક્ષિણમ્ ॥ ૩૪॥

વામાષ્ઠીવં સર્વશક્તિઃ દેવી પાતુ યુગં મમ ।
સર્વૈશ્વર્યપ્રદા દેવી દક્ષજાનું સદાઽવતુ ॥ ૩૫॥

સર્વજ્ઞાનમયી દેવી જાનુમન્યં મમાવતાત્ ।
અવ્યાદ્ દેવી દક્ષજઙ્ગાં સર્વવ્યાધિવિનાશિની ॥ ૩૬॥

તદન્યાં પાતુ દેવી સા સર્વાધારસ્વરૂપિણી ।
સર્વપાપહરા દેવી ગુલ્ફં રક્ષતુ દક્ષિણમ્ ॥ ૩૭॥

સર્વાનન્દમયી દેવી વામગુલ્ફં સદાઽવતુ ।
પાર્ષ્ણિં મે દક્ષિણં પાયાત્ સર્વરક્ષાસ્વરૂપિણી ॥ ૩૮॥

અવ્યાત્ સદા સદા પાર્ષ્ણિં સર્વેપ્સિતફલપ્રદા ।
દક્ષાઙ્ઘ્રિપાર્શ્વં વશિની પૂર્વં વાગ્દેવતા મમ ॥ ૩૯॥

સર્વં કામેશ્વરી ચોર્ધ્વમધો વાગ્દેવતા મમ ।
મોદિની પ્રપદં પાતુ વિમલા દક્ષિણેતરે ॥ ૪૦॥

અઙ્ગુલીરરુણા પાતુ દક્ષપાદનખોજ્જ્વલા ।
તદન્યા જયિની પાતુ સદા સર્વેશ્વરી મમ ॥ ૪૧॥

દક્ષવામપાદતલં કૌલિની દેવતા મમ ।
કુર્વન્તુ જૃમ્ભણા બાણાઃ ત્રૈલોક્યાકર્ષણં મમ ॥ ૪૨॥

મોહં સંહરતાદિક્ષુકોદણ્ડં ભૃઙ્ગમૌવિકમ્ ।

કરોતુ સતતં પાશી વશીકરણમદ્ભુતમ્ ॥ ૪૩॥

વિદધ્યાદઙ્કુશં નિત્યં સ્તમ્ભનં શત્રુસઙ્કટે ।
પીઠં મે કામરૂપાખ્યં પાતુ કામાન્તિકં મનઃ ॥ ૪૪॥

પૂર્ણં પૂર્ણગિરેઃ પીઠં કાન્તિં મે જનયેત્ સદા ।
જાલન્ધરમન્યજાલન્ધરપીઠં મે રક્ષતુ ॥ ૪૫॥

સાયુજ્યે નિયતાં પ્રજ્ઞાં શ્રીપીઠં શ્રીકરં મમ ।
કામેશ્વરી ત્વાત્મતત્ત્વં રક્ષેદ્ વજ્રેશ્વરી તથા ॥ ૪૬॥

વિદ્યાતત્ત્વં શૈવતત્ત્વં પાયાચ્છ્રીભગમાલિની ।
કામં વિદ્યાન્મહાશત્રૂનમૃતાર્ણવમાનસમ્ ॥ ૪૭॥

ક્રોધં ક્રોધાપહા હન્યાન્મન્યું પૈતામ્બુજાસનમ્ ।
લોભં ચિદાસનં હન્યાદ્ દેવ્યાત્મામૃતરૂપભાક્ ॥ ૪૮॥

મોહં સંહરતાચ્ચક્રં મદં મન્ત્રાસનં મમ ।
માત્સર્યં નાશયેન્નિત્યં મમ સાન્ધ્યાસનં તથા ॥ ૪૯॥

આધારં ત્રિપુરા રક્ષેત્ સ્વાધિષ્ઠાનં પુરેશ્વરી ।
મણિપૂરં મણિદ્યોતા પાયાત્ ત્રિપુરસુન્દરી ॥ ૫૦॥

અવ્યાદનાહતં ભવ્યા નિત્યં ત્રિપુરવાસિની ।
વિશુદ્ધિં ત્રિપુરા શ્રીશ્ચ આજ્ઞાં ત્રિપુરમાલિની ॥ ૫૧॥

ઇડાં મે ત્રિપુરસિદ્ધા ત્રિપુરા ચાપિ પિઙ્ગલામ્ ।
સુષુમ્નાં પાતુ મે નિત્યા પાયાત્ ત્રિપુરભૈરવી ॥ ૫૨॥

ત્રૈલોક્યમોહનં ચક્રં રોમકૂપાંશ્ચ રક્ષતુ ।
સર્વાશાપૂરકં ચક્રં સપ્તધાતૂંશ્ચ રક્ષતુ ॥ ૫૩॥

સર્વસઙ્ક્ષોભણ ચક્રં પ્રાણાદ્યં વાયુપઞ્ચકમ્ ।
સૌભાગ્યદાયકં ચક્રં નાગાદ્યનિલપઞ્ચકમ્ ॥ ૫૪॥

સર્વાર્થસાધકં ચક્રં કારણાનાં ચતુષ્ટયમ્ ।
સર્વરક્ષાકરં ચક્રં રક્ષતાન્મે ગુણત્રયમ્ ॥ ૫૫॥

સર્વરોગહરં ચક્રં પાયાત્ પુર્યષ્ટકં મમ ।
સર્વસિદ્ધિપ્રદં ચકમવ્યાન્મે કોશપઞ્ચકમ્ ॥ ૫૬॥

સર્વાનન્દમયં ચક્રં યશઃ કીર્તિં ચ રક્ષતુ ।
સૌન્દર્યં મન્મથઃ પાયાદ્ ધૃતિશ્ચાપિ રતિં મમ ॥ ૫૭॥

પ્રીતિં મે પાતુ યા પ્રીતિઃ રૂપં પાતુ વસન્તકઃ ।
સઙ્કલ્પં કલ્પકોદ્યાનં મહાલક્ષ્મી શ્રિયં મમ ॥ ૫૮॥

કાન્તિં કપાલિની રક્ષેત્ મન્દિરં મણિમણ્ડપઃ ।
પુત્રાન્ શઙ્ખયનિધિઃ પાયાદ્ ભાર્યાં પદ્મનિધિસ્તથા ॥ ૫૯॥

માર્ગે ક્ષેમઙ્કરી રક્ષેત્ માતઙ્ગી મુકુટં તથા ।
યોગિની પ્રકટાદ્યાસ્તા નવદ્વારાણિ પાન્તુ મે ॥ ૬૦॥

ભોજને મામન્નપૂર્ણા માતઙ્ગી ક્રીડનેઽવતાત્ ।
વને રક્ષતુ માં દુર્ગા જાગ્રતી દુષ્ટનિગ્રહે ॥ ૬૧॥

ત્રિધાઽહઙ્કારનૈશ્ચુર્યદોષત્રયં મલત્રયમ્ ।
ડાકિન્યો યોગિનીમુખ્યાઃ સંહરન્તુ મમાનિશમ્ ॥ ૬૨॥

ઇચ્છાશક્તિર્ગુરોર્ભક્તિં પાતુ મે જ્ઞાનમાત્મનિ ।
જ્ઞાનશક્તિઃ ક્રિયાશક્તિર્વૈરાગ્યવિષયેષ્વપિ ॥ ૬૩॥

હૃત્પદ્મકર્ણિકામધ્યે હ્રીઙ્કારી પરિરક્ષતુ ।
વૈખરી શ્રવણં પાતુ મધ્યમા મનનં પુનઃ ॥ ૬૪॥

યોગં રક્ષતુ પશ્યન્તી સાક્ષાત્ જ્ઞાનપરા મમ ।
બ્રહ્માણી જાગૃતં પાતુ શયાનં વૈષ્ણવી તથા ॥ ૬૫॥

સુષુપ્તૌ ચણ્ડિકા પાતુ તુર્યાં મે મોહકારિણી ।
સદા માં ભૈરવી પાતુ જગદ્ભરણપણ્ડિતા ॥ ૬૬॥

ચરણામ્ભોરુહાનન્દપરામૃતરસેરિતા ।
પ્લાવિની કુણ્ડલી પૂર્ણા અન્તરાન્તં સદાઽવતાત્ ॥ ૬૭॥

અષ્ટદિક્ષુ મહેન્દ્રાદ્યા સાયુધાઃ પાન્તુ સર્વદા ।
પાયાદૂર્ધ્વાં દિશં બ્રહ્મા વિષ્ણુશ્ચક્રાયુધોપ્યધઃ ॥ ૬૮॥

અનાવૃત્તાનિ સ્થાનાનિ કવચેન તુ યાનિ મે ।
તાનિ સર્વાણિ રક્ષન્તુ શિવાદ્યા ગુરવઃ સદા ॥ ૬૯॥

ફલશ્રુતિઃ ।
એતત્ સૌભાગ્યકવચં શાઙ્કરં યસ્તુ પાઠયેત્ ।

ત્રિસન્ધ્યં યઃ પઠેદ્ ભક્ત્યા શ‍ૃણુયાદ્ વા સમાહિતઃ ॥ ૧॥

તસ્ય શીઘ્રેણ સિધ્યન્તિ સિદ્ધયસ્ત્વણિમાદયઃ ।
ગુટિકાપાદુકાદ્યષ્ટસિદ્ધયઃ સમ્ભવન્તિ ચ ॥ ૨॥

વશ્યાદીન્યષ્ટકર્માણિ યોગશ્ચાષ્ટાઙ્ગસંયુતઃ ।
બ્રહ્માવિષ્ણુગિરીશેન્દ્રકન્દર્પરતિભિઃ સહ ॥ ૩॥

વિચરન્તે તદખિલાન્ સિદ્ધગન્ધર્વસેવિતાઃ ।
તસ્ય સ્મરણમાત્રેણ ગ્રહભૂતપિશાચકાઃ ॥ ૪॥

કીટવત્ પ્રપલાયન્તે કષ્માણ્ડા ભૈરવાદયઃ ।
તસ્યાઙ્ઘ્રિતોયપતનાત્ પ્રશામ્યતિ મહારુજાઃ ॥ ૫॥

તત્પાદકમલાસક્તરજોલેશાભિમર્શનાત્ ।
વશ્યં ભવતિ શીઘ્રેણ ત્રૈલોક્યં સચરાચરમ્ ।
આબાલમહિલાભૂપાઃ કિમુ માયાવિમોહિતાઃ ॥ ૬॥

॥ ઇતિ વામકેશ્વરન્તન્ત્રે નિત્યાષોડશિકાર્ણવે શ્રીસૌભાગ્યકવચમ્ ॥

Encoded and proofread by Rama Prakasha ramaprakashak at gmail.com

*Shri Saubhagya Kavacha Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*